# shrIkRiShNastutiH

# શ્રીકૃષ્ણસ્તુતિઃ

## Document Information

Text title : shrIkRiShNastutiH from Gargasamhita

File name : kRiShNastutiHgargasamhitA.itx

Category : vishhnu, krishna, stotra, vishnu

Location : doc_vishhnu

Transliterated by : Vishwas Bhide vrbhide at rediffmail.com

Proofread by : Vishwas Bhide, PSA Easwaran

Description-comments : gargasamhitA

Acknowledge-Permission: Vishwas Bhide http://satsangdhara.net/

Latest update : February 3, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીકૃષ્ણસ્તુતિઃ

દેવા ઊચુઃ -
કૃષ્ણાય પૂર્ણપુરુષાય પરાત્પરાય યજ્ઞેશ્વરાય પરકારણકારણાય ।
રાધાવરાય પરિપૂર્ણતમાય સાક્ષાદ્ગોલોકધામધિષણાય નમઃ પરસ્મૈ ॥ ૧॥

યોગેશ્વરાઃ કિલ વદન્તિ મહઃ પરં ત્વાં
    તત્રૈવ સાત્વતમનાઃ કૃતવિગ્રહં ચ ।
અસ્માભિરદ્ય વિદિતં યદદોઽદ્વયં તે
    તસ્મૈ નમોઽસ્તુ મહસાં પતયે પરસ્મૈ ॥ ૨॥

વ્યઙ્ગ્યેન વા ન ન હિ લક્ષણયા કદાપિ
    સ્ફોટેન યચ્ચ કવયો ન વિશન્તિ મુખ્યાઃ ।
નિર્દેશ્યભાવરહિતઃ પ્રકૃતેઃ પરં ચ
    ત્વાં બ્રહ્મ નિર્ગુણમલં શરણં વ્રજામઃ ॥ ૩॥

ત્વાં બ્રહ્મ કેચિદવયન્તિ પરે ચ કાલં
    કેચિત્પ્રશાન્તમપરે ભુવિ કર્મરૂપમ્ ।
પૂર્વે ચ યોગમપરે કિલ કર્તૃભાવ-
    મન્યોક્તિભિર્ન વિદિતં શરણં ગતાઃ સ્મઃ ॥ ૪॥

શ્રેયસ્કરીં ભગવતસ્તવપાદસેવાં
    હિત્વાથ તીર્થયજનાદિ તપશ્ચરન્તિ ।
જ્ઞાનેન યે ચ વિદિતા બહુવિઘ્નસઙ્ઘૈઃ
    સન્તાડિતા કિમુ ભવન્તિ ન તે કૃતાર્થાઃ ॥ ૫॥

વિજ્ઞાપ્યમદ્ય કિમુ દેવ અશેષસાક્ષી
    યઃ સર્વભૂતહૃદયેષુ વિરાજમાનઃ ।
દેવૈર્નમદ્ભિરમલાશયમુક્તદેહૈ-
    સ્તસ્મૈ નમો ભગવતે પુરુષોત્તમાય ॥ ૬॥

યો રાધિકાહૃદયસુન્દરચન્દ્રહારઃ
    શ્રીગોપિકાનયનજીવનમૂલહારઃ ।
ગોલોકધામધિષણધ્વજ આદિદેવઃ
    સ ત્વં વિપત્સુ વિબુધાન્ પરિપાહિ પાહિ ॥ ૭॥

વૃન્દાવનેશ ગિરિરાજપતે વ્રજેશ
    ગોપાલવેષકૃત નિત્યવિહારલીલ ।
રાધાપતે શ્રુતિધરાધિપતે ધરાં ત્વં
    ગોવર્દ્ધનોદ્ધરણ ઉદ્ધર ધર્મધારામ્ ॥ ૮॥

ઇતિ ગર્ગસંહિતાયાં ગોલોકખણ્ડે તૃતીયાધ્યાયાન્તર્ગતા ગોલોકે
દેવાનાં શ્રીકૃષ્ણસ્તુતિઃ સમાપ્તા ।

Garga Samhita, Golokakhanda, Adhaya 3 verses 15-22
Encoded by Vishwas Bhide vrbhide at rediffmail.com http://satsangdhara.net/
Proofread by PSA Easwaran

*shrIkRiShNastutiH*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*